Published by Janardan Sakharam Kudalkar, M. A., LL. B., Curator of State Libraries, Baroda, for the Baroda Government, and Printed by Ramchandra Yesu Shedge, at the 'Nirṇaya-Sāgara' Press, 23, Kolbhat Lane, Bombay

Price Rs. 2

INTRODUCTION

The present book entitled *Sangīta Makaranda* by Nārada is one of the very few Sanskrit works on Music that have been hitherto printed and published.

Materials for a history of ancient Indian Music—

If the reader will just have a glance at the list, which is by no means complete, of Sanskrit works specially appended to this edition for the information of the researchers in the Department of Music, he will have an idea of the extent of the literature on the subject. The list does not include the names of a number of works written by many ancient masters of Music such as Venā, Matanga, Kohala, Tumburu, Yāshtika, Vis'vāvasu, Hanumān alias Ānjaneya, Dantila, Kambala, As'vatara, Rudrata, Kās'yapa, Umāpati[1], Gopāla Nāyaka &c. from whose works quotations have been made by Chatura Kallinātha (about A. D 1400–1500) in his commentary on *Sangīta Ratnākara*. Unfortunately Kallinātha mentions only the names of the authors and not the names of their works. Hence the names of the works of these authors could not be included in the list. In the above commentary Chatura Kallinātha has quoted one whole chapter from a work called '*Sangīta Meru*' by Kohala[2]. In this chapter Kohala mentions the names of the following writers on Music (probably dancing)—Bhatta Tandu, S'ambhu, Sumantu, Purari, Kshemarāja and Lohita Bhatta. He also mentions the name of a work entitled *Desī Nritta Samudra* by Nārada. Sārngadeva mentions a work called *Brihaddesī* by Yāshtika[3]. Besides these, names of numerous other authors have been mentioned by Sārngadeva in his *Sangīta Ratnākara* without specifying their works. As research work is being carried on by various Scholars and Institutions, it is likely that many of these works may come to light hereafter.

---

1. The Baroda Central Library has secured a copy of Umāpati's work entitled "*Aumāpatya*" from the Ms. in the [illegible] Govt. Library.
2. Vide *Sangīta Ratnākara* Vol. II, p. [illegible]
3. Vide *Sangīta Ratnākara* Vol. I, p. [illegible]

If all this vast hidden literature on Music existing in manuscripts at present be published, it will supply sufficient material to scholars to construct an authentic history of the origin and development of Aryan Music in India. Besides these works, the Vedis, Brâmhanas, Âranyakas, the various Suttras, Smritis, Purânas, and the Kâvyas and all such ancient literature, if studied critically with a view to collect materials for a history of Music, will surely disclose much interesting and valuable information. As an instance I may quote here the following passage from *Aitareya Âranyaka* which incidentally furnishes a description of the Vinâ that was in vogue in those times .—

" अथ खल्वियं दैवी वीणा भवति, तदनुकृतिरसौ मानुषी वीणा भवति । यथास्याः शिर एवममुष्याः शिरः, यथास्या उदरमेवममुष्या अम्भणम् । यथास्यै जिह्वा एवममुष्यै वादनम्, यथास्यास्तन्त्रय एवममुष्या अङ्गुलयः । यथास्याः स्वरा एवममुष्याः स्वराः, यथास्याः स्पर्शा एवममुष्याः स्पर्शाः, यथा ह्येवेयं शब्दवती तर्द्मवती एवमसौ शब्दवती तर्द्मवती, यथा ह्येवेयं लोमशेन चर्मणापिहिता भवति एवमसौ लोमशेन चर्मणाऽपिहिता । लोमशेन ह स्म वै चर्मणा पुरा वीणा अपिदधति । स यो हैतां दैवीं वीणां वेद श्रुतवदनो भवति, भूमिप्रास्य कीर्तिर्भवति, यत्र क्वचार्या वाचो भाषन्ते विदुरेनं तत्र " इति

ऐतरेयारण्यक आ० ३ अ० २ खं० ५
(आनन्दाश्रममुद्रक पृ० २२१)

Now this passage furnishes a good deal of information about the Vinâ then in vogue. The words Ambhana, Vâdana, Tantrayah, Svarâh, Spars'âh, S'abda and Tardma as applied to Vinâ have a technical sense and prove that the Modern Vinâ (Bina) has much in common with the ancient Vinâ. Besides, the passage specially records the fact that in earlier times prior to the composition of the work (*Aitareya Brâmhana*) a part of the Vinâ was covered with leather and that the practice had disappeared at the time of the said work.

Origin of Âryan Music—The elements of the art of Music seem to have originated with the Vedic songs called "Sâmas" which were sung at the time of performing particular ceremonies during a sacrifice. The rules about the singing of these "Sâmas" are recorded in some ancient Sanskrit treatises. We have no means of ascertaining the process by which the "Sâma" Music

developed into the more refined Music practised at the time of Bharata who is known as the founder of the present system of Music, although subsequent professors of the art may have further developed it and established different schools of Music by introducing innovations by their talents.

Bharata's *Nâtya Sâstra*—Bharata's *Nâtya Sâstra* is the most ancient of the books on Music handed down to posterity. Some scholars assign it to the first century after Christ, others to the fourth century. It is well-known that it is difficult to decide precisely the dates of ancient authors. Although as already hinted above many writers on Music came after Bharata, we have no means of giving any historical account of their lives and works.

S'àrngadeva's *Sangîta Ratnâkara*—the next author, whose work is available in print, is S'ârngadeva, the author of *Sangîta Ratnâkara*, who lived in the reign of King S'inghaṇa of Devagiri Modern Doulatâbâd (A. D. 1210-1247). Among the authors of books on Music, besides the names of deities such as Sadâs'iva &c., S'ârngadeva mentions the following names :—

Bharata, Kas'ypa, Matanga, Yâs'tika, S'ârdûla, Kohala, Vis'akhila, Dantila, Kambala, As'vatara, Vâyu, Vis'vâvasu, Arjuna, Nârada, Tumburu, Ânjaneya, Matrigupta, Swâti, Guna, Bindurâja, Kshetrarâja, Râhala, Rudrata, Nânya-bhûpâla, Bhojarâja and Paramardi Somes'a Mahipati. Among the commentators on Bharata's *Nâtya Sâstra* he mentions the names of Lollata, Udbhata, S'ankuka, Abhinavagupta and Kirtidhara.

I do not take any account of several other books such as *Sangîta Pârijâta*, *Râgavibodha*, *Sangîta Darpana*, *Rhidaya-Koutuka*, *Rhidaya-prakâs'a* &c., because all of them are of a later date.

Nârada, the author of the present work *Sangîta Makaranda*—The present work viz., *Sangîta Makaranda* is said to be the work of Nârada on the authority of the manuscript. It is difficult to say anything with certainty about Nârada's life and time. I shall place before the reader whatever can be gathered from internal evidence available in the book itself.



Nârada only mentions the names of the 18 **Jatis**[1] described by Bharata but does not give their definitions or examples as is done in the *Sangita Ratnâkara*.

As regards the Alankâras (combinations of notes for developing a Râga) he has mentioned only 19[2], whereas S'ârngadeva has mentioned about 63 in the *Sangita Ratnâkara*. The *Sangita Pârijâta* mentions 68 Alankâras and the *Râgavibodha* gives only 34.

Nârada has enumerated in all 93 different Râgas. *Sangita Ratnâkara* contains 264 Râgas in all. The *Sangita Pârijâta* describes 122 Râgas while the *Râgavibodha* enumerates about 50 Râgas.

Nârada mentions 3 species of Râgas viz. 1 पुरुषरागाः Masculine Râgas 2 स्त्रीरागाः Feminine Râgas and 3 नपुंसकरागाः Neuter Râgas[3].

Again he divides the Râgas into three groups viz. 1 मुक्ताङ्गकम्पिताः Râgas which have quivering (कम्पितगमक) throughout, 2 अर्धकम्पिताः Râgas which have partial quivering, and 3 कम्पविहीना Râgas which are absolutely free from quivering[4]. The *Sangita Ratnâkara* and other later books do not mention these divisions.

As regards the Vinâ instrument our author says that there are 18 kinds of it. But the number of the names given comes to 19. They are — १ कच्छपी २ कुब्जिका ३ चित्रा ४ वहन्ती ५ परिवादिनी ६ जया ७ घोषावती ८ ज्येष्ठा ९ नकुली १० महती ११ वैष्णवी १२ ब्राह्मी १३ रौद्री १४ कूर्मी १५ रावणी १६ सरस्वती १७ किन्नरी १८ सैरन्ध्री १९ घोषका. If we take परिवादिनी as a common name for Vinâ instead of a particular kind, then the number 18 given by the author can be reconciled with the names. He states that these various kinds are due to the difference in the arrangement of the strings[5]. But S'ârngadeva mentions the following 11 kinds of Vinâ — १ एकतन्त्री २ नकुल ३ त्रितन्त्रिका ४ चित्रा ५ वीणा ६ विपञ्ची ७ मत्तकोकिला ८ आलापिनी ९ किन्नरी १० पिनाकी and ११ निःशङ्कवीणा. Chatura Kallinâtha, the commentator of *Sangita Ratnâkara*, says that the last mentioned Vinâ was invented by S'ârngadeva whose honorific title was निःशङ्क[6].

---

1. Vide page 10, verses 106–110.
2. Vide page 14, verses 14–17.
3. Vide page 18 verses 53–63.
4. Vide page 20 verses 84–85.
5. Vide page 22 verses 6–8.
6. Vide *Sangita Ratnâkara* Vol. II, p. 480.

the Gândhâra Grâma states that it is according to Nârada's *opinion* :—

> यद्रा धत्रिश्रुतिः षड्जे मध्यमे तु चतुःश्रुतिः ।
> रिमयोः श्रुतिमेकैकां गान्धारश्चेत्समाश्रितः ।
> पश्रुतिं धो निषादस्तु धश्रुतिं सश्रुतिं श्रितः ॥ ४ ॥
> गान्धारग्राममाचष्टे तदा तं नारदो मुनिः ।
> प्रवर्तते स्वर्गलोके ग्रामोऽसौ न महीतले ॥ ५ ॥
>
> संगीतरत्नाकर पृ० ४६

Now this very definition is to be found in this *Sangîta Makaranda* of Nârada as follows :—

> यदा धत्रिश्रुतिः षड्जे मध्यमे तु चतु श्रुतिः ।
> रिमयोः श्रुतिरेकैका गान्धारस्य समाश्रया ॥ ५४ ॥
> पञ्चमश्रुतिरेका च निषादश्रुतिसंश्रया ।
> गान्धारग्राममाचष्टे तदा तं नारदोऽब्रवीत् ॥ ५५ ॥
> प्रवर्तकः स्वर्गलोके ग्रामोऽसौ न महीतले ।
>
> सङ्गीतमकरन्द पृ० ५-६

From these circumstances we must conclude that *Sangîta Makaranda* of Nârada is an older work than the *Sangîta Ratnâkara* and that it was known to S'ârngadeva (A. D. 1210–1247). Until we get further proof to establish the exact date, we must hold that Nârada, the author of *Sangîta Makaranda* lived sometime in the interval between Mâtrigupta A. D. 550 and S'ârngadeva A. D. 1210–1247, that is, he must have lived between the 7th and 11th centuries.

The Manuscript.

Source of the Manuscript—*The present edition of the Sangîta Makaranda of Nârada is based upon one single manuscript* furnished to me by the Central Library of Baroda.

The credit of having discovered this rare manuscript is due to the wife of Mr. R. Ananta Krishna Shâstry, the officer employed by the Baroda Central Library for search of Sanskrit manuscripts. Mr. Shâstry, while on an official tour in H. E. H. the Nizam's Territory in 1919, was examining Mss. in an old Pandit's house at Gadwâl with his wife when the latter noticed this Ms. Through the kindness of the Hon. Sir Stuart Fraser, K. C. S. I.,

C. I. E., the then Resident of Hyderâbâd Mr. Shâstri obtained a note on H. H. The Raja Saheb of Gadwal through Mr. M. A. N. A. Hydari, B. A., Judicial Secretary, Hyderabad. Thus Mr. Shâstry got the loan of the manuscript through the kind influence of the Râjâ Sâheb to whom are due the sincerest thanks of all lovers of Indian music.

Description of the Manuscript—The manuscript is written in Devanâgari characters on old Ahmedabad paper of a yellowish tinge. It consists of 32 folios, the size of the folio being 10¼ × 5¼ inches and each side of the folios containing 9 lines. The hand-writing is fair and the headings of the subjects in the body of the text are written in red ink the colour of which has not faded, though the manuscript was written in the Shake year 1599 (A. D. 1677) that is 243 years ago. On the last three pages the copyist has painted 9 different designs of a rosette in black, yellow, red and green colours.

The manuscript begins as follows:—

श्रीमहागणपतये नमः । श्रीसाम्बसदाशिवाय नमः । श्रीमातृभूतेश्वराय नमः ।

The colophon is as follows:—

इति सङ्गीतमकरन्दः समाप्तः । शुभमस्तु । शके १५९९ शालिवाहे पिङ्गलनामसंवत्सरे आश्विनमासे शुक्लपक्षे विजयादशम्यां विद्यापुरमहानगरे श्रीमन्महागणपतिदासकृष्णाजीदत्तेनेदं सङ्गीतमकरन्दाख्यपुस्तकं लिखितम् । महागणपतिर्जयति ॥

From this colophon it is evident that the manuscript was copied in Shake 1599 (A. D. 1677) by one Krishnâji Datta who was a devotee of the deity Mahâganapati and lived in Vidyâpura.

This Vidyâpura is no other than Vijayanagara which was the capital of the late Vijayanagara Empire and which is now in ruins. The present manuscript was discovered at Gadwâl which, though now a feudatory of the Hyderabad State, was in former times a feudatory or a part of the Vijayanagara Empire. It is probable that after the complete ruin of Vidyâpura alias Vijayanagara the manuscript must have come to Gadwâl which is not very far from the ruined capital. For this information I am indebted to my friend Mr. J. S. Kudâlkar of Baroda Central Library.



सङ्गीतमकरन्दग्रन्थस्य विषयानुक्रमणी ।

सङ्गीताध्याये प्रथमः पादः ।

श्लोकाङ्काः विषयः पृष्ठं

सङ्गीताध्याये द्वितीयः पादः ।

सङ्गीताध्याये तृतीयः पादः ।

सङ्गीताध्याये चतुर्थः पादः ।

विषयानुक्रमणी ।

नृत्याध्याये चतुर्थः पादः ।

ॐ

श्रीनारदविरचितः

सङ्गीतमकरन्दः ।

सङ्गीताध्याये प्रथमः पादः ।

प्रणम्य शिरसा देवं शङ्करं लोकशङ्करम् ।
सङ्गीतशास्त्रं सङ्गृह्य वक्ष्ये लोकमनोहरम् ॥ १ ॥

ब्रह्मा तालधरो हरिश्च पटही वीणाकरा भारती
वंशाढ्यौ शशिभास्करौ श्रुतिधराः सिद्धाप्सरःकिन्नराः ।
नन्दीभृङ्गिरिटादिमर्दलधराः सङ्गीतको नारदः
शम्भोर्नृत्तपरस्य मङ्गलतनोर्नाट्यं सदा पातु नः ॥ २ ॥

गीतं वाद्यं च नृत्यं च त्रयं संगीतमुच्यते ।
नारदेन कृतं शास्त्रं मकरन्दाख्यमुत्तमम् ॥ ३ ॥

आदौ नादोत्पत्तिर्निरूप्यते ।

अनाहतो हतश्चैव स नादो द्विविधो मतः ।
तथोभयोस्तयोर्मध्येऽनाहतोऽपि निरूप्यते ॥ ४ ॥

---

१ [illegible] —
"[illegible] ।
[illegible]"
[illegible] ।
[illegible] । २ [illegible] ।

आकाशसंभवो नादो यः सोऽनाहतसंज्ञितः ।
तस्मिन्ननाहते नादे विरामं प्राप्य देवताः ॥ ५ ॥
योगिनोऽपि महात्मानस्तदानाहतसंज्ञके ।
मनो निक्षिप्य संयान्ति मुक्तिं प्रयतमानसाः ॥ ६ ॥
सोऽप्याहतः पञ्चविधो नादस्तु परिकीर्तितः ।
नखवायुजचर्माणि लोहशारीरजास्तथा ॥ ७ ॥
नखं वीणादयः प्रोक्ता वंशाद्या वायुपूरकाः ।
चर्माणि च मृदङ्गाद्या लोहास्तालादयस्तथा ॥ ८ ॥
देहनादेन ते युक्ता नादाः पञ्चविधाः स्मृताः ।
गीतं वाद्यं च नृत्यं च त्रयं सङ्गीतमुच्यते ॥ ९ ॥
आदौ ब्रह्मा विचार्यैव नाट्यं लोके प्रपञ्चितम् (?) ।
अनाहतात्समाकृष्य सप्तनामानि योजितः ॥ १० ॥
तं नादं सप्तधा कृत्वा तथा षड्जादिभिः स्वरैः ।
नाभिहृत्कण्ठतालुषु नासादन्तोष्ठयोः क्रमात् ॥[1] ११ ॥
षड्जश्चर्षभगान्धारौ मध्यमः पञ्चमस्तथा ।
धैवतश्च निषादश्च स्वराः सप्त प्रकीर्तिताः ॥ १२ ॥
षड्जं मयूरो वदति चातको ऋषभं तथा (?) ।
अजो विरौति गान्धारं क्रौञ्चः क्वणति मध्यमम् ॥ १३ ॥
पुष्पसाधारणे काले पिकः कूजति पञ्चमम् ।
अश्वश्च धैवतं चैव निषादं च गजस्तथा ॥ १४ ॥
एवं स्वरान् समाकृष्य वीणादिषु निधाय च ।
तेन चाहतनादेन सङ्गीतमकरोत्तदा ॥ १५ ॥
सरस्वत्याश्च वीणायां षड्जादिस्वरसंयुतम् ।
पाठयामास गन्धर्वान् हृद्यं श्रुतिमनोहरम् ॥ १६ ॥
रूपालप्ती रागालप्तिरिति स द्विविधः स्मृतः ।
रागालप्तिरनालापरूपतः शब्द उच्यते ॥ १७ ॥

---

१ अत्र श्लोकस्य [illegible] । [illegible] यथा [illegible] निर्दिष्टम् । २ '[illegible]' इति पाठे [illegible] स्यात् । ३ '[illegible]' इति [illegible] स्यात् ।

सामवेदादिदं गीतं तज्जग्राह पितामहः ।
तद्गीतं नारदायैव तेन लोकेषु वर्णितम् ॥ १८ ॥
गीतेन प्रीयते देवः सर्वज्ञः पार्वतीपतिः ।
गोपीपतिरनन्तोऽपि वंशध्वनिवशं गतः ॥ १९ ॥
सामवेदे रतो ब्रह्मा वीणासक्ता सरस्वती ।
अन्ये च बहवः पूर्वे यक्षदानवमानवाः ॥ २० ॥
अज्ञातहृदयस्त्वाद्दुर्बालः पर्यङ्कधारकः ।
रुदन् गीतामृतं पीत्वा हर्षोत्कर्षं प्रपद्यते ॥ २१ ॥
वनेचरस्तृणाहारः श्रुत्वा मृगशिशुः पशुः ।
लुब्धो लुब्धकसङ्गीते गीते यच्छति जीवितम् ॥ २२ ॥
कृष्णसर्पोऽपि तं नादं श्रुत्वा हर्षं प्रपद्यते ।
तस्य गीतस्य माहात्म्यं कः प्रशंसितुमर्हति ॥ २३ ॥
सर्वाश्रमाणां जातीनां नृपाणां प्रीतिवर्धनम् ।
धर्मार्थकाममोक्षाणामिदमेव हि साधनम् ॥ २४ ॥
स्थायी स्वरेषु सञ्चारी तथारोह्यवरोहकौ ।
स्वराश्चतुर्विधा ज्ञेया रागोत्पादनगोचराः ॥ २५ ॥
स्वरा वादी च संवादी विवादी च चतुर्विधाः ।
अनुवादी च सर्वत्र प्रयोगे बहुशः स्मृतः ॥ २६ ॥
वादी स्वरस्तु राजा स्यान्मन्त्री संवादिरुच्यते ।
स्वरो विवादी वैरी स्यादनुवादी च भृत्यवत् ॥ २७ ॥
देववंशास्तु सगमाः पञ्चमः पितृवंशजः ।
रिधौ ऋषिकुले जातौ निषादोऽसुरवंशजः ॥ २८ ॥
ब्रह्मजाती समौ ज्ञेयौ रिधौ क्षत्रियजातिकौ ।
निगौ वैश्यावित्ति प्रोक्तौ पञ्चमः शूद्रजातिकः ॥ २९ ॥

---

१ 'तज्जग्राह' इति पाठः समीचीनः । २ 'रतौ' इति समीचीनः पाठः स्यात् । ३ 'स्मृताः' इति बहुवचनान्तः पाठः समीचीनः । ४ 'संवादी' इति शुद्धं पदं, छन्दोभङ्गभिया 'संवादिः' इति रूपं कृतमिति भाति ।

पद्माभः पिञ्जरः स्वर्णवर्णः कुन्दप्रभः सितः ।
पीतः कर्बुर इत्येते तेषां वर्णा निरूपिताः ॥ ३० ॥
षड्जः कमलवर्णः स्यादृषभः पिञ्जरस्तथा ।
गान्धारः स्वर्णवर्णः स्यान्मध्यमः कुन्दवर्णकः ॥ ३१ ॥
पञ्चमः सितवर्णः स्याद्धैवतः पीतवर्णकः ।
नैषादः कर्बुरो वर्णः सप्तवर्णा निरूपिताः ॥ ३२ ॥
जम्बुशाककुशक्रौञ्चशाल्मलीश्वेतनामसु ।
द्वीपेषु पुष्करे चैव जाताः षड्जादयः स्वराः ॥ ३३ ॥
जम्बुद्वीपे च षड्जः स्याच्छाकले ऋषभोदयः ।
कुशद्वीपे च गान्धारः क्रौञ्चद्वीपे च मध्यमः ॥ ३४ ॥
शाल्मलीद्वीपनामाख्ये पञ्चमः स्वर उद्भवः(?)[1] ।
श्वेतद्वीपे तथा जन्म धैवतं नामसंज्ञिकम्(?) ॥ ३५ ॥
पुष्करे चैव जातोऽयं निषादः परिकीर्तितः ।
सप्तस्वरान्समुद्धृत्य वीणादिषु निधाय च ॥ ३६ ॥
दक्षोऽत्रिः कपिलश्चैव वसिष्ठो भार्गवस्तथा ।
नारदस्तुम्बुरुश्चैव षड्जादीनां ऋषीश्वराः ॥ ३७ ॥
वह्निर्ब्रह्मा शारदा च शर्वश्रीनाथभास्कराः ।
गणेश्वरादयो देवाः षड्जादीनां तु देवताः ॥ ३८ ॥
क्रमादनुष्टुब्गायत्री त्रिष्टुप् च बृहती तथा ।
पङ्क्त्युष्णिगौ च जगती छन्दांसि परिकीर्तिताः (?)[2] ॥ ३९ ॥
षड्जस्य जमदग्निश्च आत्रेयो ऋषभस्य च(?) ।
गान्धारस्य गौतमस्तु वसिष्ठो मध्यमस्य च ॥ ४० ॥
श्रीवत्सः पञ्चमस्यैव धैवतस्य पराशरः ।
शालङ्कायो निषादस्य गोत्राणि कथितानि च ॥ ४१ ॥
षड्जः शतभिषग्जश्च चित्रा च ऋषभस्य च(?)[3] ।
गान्धारस्य धनिष्ठा भं मध्यमस्य मघा स्मृता ॥ ४२ ॥

---

१ 'पञ्चमस्य समुद्भवः' इति पाठः समीचीनः स्यात् । २ त्रिष्टुप्योऽयं पाठः । ३ अतःपद-[illegible] शोधनीयम् ।

पञ्चमस्योत्तरा भं स्यात्पूर्वाषाढा तु धैवतम् ।
अनुराधा निषादस्य षड्जादीनां तु तारकाः ॥ ४३ ॥
कुम्भस्तुला मेषश्चैव सिंहः कन्या धनुस्तथा ।
वृश्चिकश्च तथा राशयः क्रमाज्ज्ञेया बुधैः सदा ॥ ४४ ॥
शनिर्भृगुः शशी चैव सूर्यश्चन्द्रसुतस्तथा ।
गुरुर्भूमिसुतश्चैव [1]चैते राश्यधिदेवताः ॥ ४५ ॥
स्वराः सरिगमाश्चैव चत्वारो राक्षसाः स्मृताः ।
पधौ मानुषसंज्ञौ च निषादं दैवतं विदुः ॥ ४६ ॥
षड्जस्याद्भुतवीरौ च ऋषभस्य च रौद्रकः ।
गान्धारस्य च शान्तं च हास्याख्यं मध्यमस्य च ॥ ४७ ॥
पञ्चमस्य च शृङ्गारो बीभत्सो धैवतस्य च ।
करुणा च निषादस्य मतसम्यानरसा नव ॥ ४८ ॥
ग्रामः स्वरसमूहः स्यान्मूर्छना तु स्वराश्रया ।
षड्जमध्यमगान्धारग्रामत्रयमुदाहृतम् ॥ ४९ ॥
षड्जश्च मध्यमश्चैव चैतौ भूमौ प्रकल्पितौ ।
स्वर्गलोकेऽपि गान्धारः प्रसिद्धो न महीतले ॥ ५० ॥
षड्जग्रामः पञ्चमश्च धैवतश्च श्रुतिक्रमात् ।
मध्यमः पञ्चमः शुद्धषड्जसंवादिरुच्यते ॥ ५१ ॥

अयं तु षड्जग्रामः ।

सोपान्ते पञ्चमस्तिस्रो धैवतस्य चतुःश्रुतिः ।
पञ्चमो धैवतश्चैवर्षभः संवादिरुच्यते ॥ ५२ ॥

अयं तु मध्यमग्रामः ।

अप्रसिद्धोऽपि भूलोके क्रमाद्वक्ष्येऽपि नारदः ।
तत्सु(त्स्व?)रूपं देवलोके ज्ञातव्यं शास्त्रलक्षणैः ॥ ५३ ॥
यदाथस्त्रिश्रुतिः षड्जे मध्यमे तु चतुःश्रुतिः ।
रिमयोः श्रुतिरेकैका गान्धारस्य समाश्रया ॥ ५४ ॥

---

१ 'चैता राश्यधिदेवताः' इति समीचीनः पाठः । २ 'शान्तश्च हास्याख्यो मध्यमस्य च' इति पाठः साधुः । ३ अस्फुटार्थोऽयं श्लोकः ।

ग म प ध नि स रि ।

षड्जः प्राधान्यमापत्त्वादमात्यादिगतस्तथा (१) ।
ग्रामः स्यादथ लोपत्वान्मध्यमस्तु पुरःसरः ॥ ६३ ॥
क्रमाद्ग्रामत्रये देवा ब्रह्मविष्णुमहेश्वराः ।
हेमन्तग्रीष्मवर्षासु ज्ञातव्यास्तु यथाक्रमम् ॥ ६४ ॥
पूर्वाह्णकाले मध्याह्ने अपराह्णे नयादिभिः ।
षड्जादिमध्यगान्धाराः श्रुपेतैश्वर्यसन्ततिः१ ॥ ६५ ॥
क्रमात्स्वराणां सप्तानामारोहश्चावरोहणम् ।
मूर्च्छनेत्युच्यते ग्रामद्वये ताः सप्त सप्त च ॥ ६६ ॥
षड्ग्रामे तु क्रमम् मन्द्रोपिरटनीयता (१) ।
शुद्धषड्जा मत्सरीकृदश्वक्रान्ताभिरुद्गता ॥ ६७ ॥
ताः शुद्धमध्यमार्गेण सप्त पारं च हृष्यकाः ।
मध्यमस्थानषड्जेन मूर्च्छनारभ्यते क्रमात् ॥ ६८ ॥
अधःस्थानैर्निषादाद्यैः षड्जः स्यान्मूर्च्छनाक्रमात् ।
मध्यममध्यममारभ्य संवीरी मूर्च्छना भवेत् ॥ ६९ ॥
षड्जस्थानपदोपस्थस्वराद्वारभ्यते क्रमात् ।
षड्जस्थानस्थितैराद्यैरथान्याद्याः परे विदुः (१) ॥ ७० ॥
हरिणाश्वादिरागाद्यैर्मध्यमस्थानसंज्ञितैः ।
षड्जादीन्मध्यमादींश्च ततोऽर्द्धः सः स्वरः क्रमात् ॥ ७१ ॥
चतुर्धा ताः पृथक् शुद्धाः काकलीकलितास्तथा ।
सान्तराः सद्वयोपेताः षट्पञ्चाशदुदीरिताः ॥ ७२ ॥
श्रुतिद्वयं चेत् षड्जस्य निषादः संश्रयेदसौ ।
सा काकली मध्यमस्य गान्धारस्त्वन्तरः स्वरः ॥ ७३ ॥

---

१ संगीतरत्नाकरेऽस्य श्लोकस्य पाठो दृश्यते यथा—

'षड्जः प्रधान आद्यत्वादमात्याधिपतस्तथा ।
ग्रामे स्यादविलोपित्वान्मध्यमस्तु पुरःसरः ॥' सं. र. पृ. ४६

२ '°सु गातव्या°' इति संगीतरत्नाकरे पृ. ४६ । ३ 'षड्जे क्रमशो मन्द्रादौ रजनी चोत्तरायता' इति शुद्धः पाठः स्यात् ।

जातिभिः श्रुतिभिश्चैव स्वरा ग्रामत्वमागताः ।
तद्भूस्थैव भूत्वैव काव्यमन्यप्रतिष्ठिताः ॥ ८६ ॥
स्वराः षड्जादयस्तत्र ग्रामौ द्वौ षड्जमध्यमौ ।
केचिद्गान्धारमप्याहुः स तु नेहोपलभ्यते ॥ ८७ ॥
सप्तस्वरादयो ग्रामे चतुर्दश च मूर्च्छनाः ।
तासामेकोनपञ्चाशद्विलेनतत्स्वरमण्डलम् ॥ ८८ ॥
भूर्लोकाच्चायने षड्जो भुवर्लोकात्तु मध्यमः ।
स्वर्गलोकात्तु गान्धारो नारदस्य मतं यथा ॥ ८९ ॥
आद्या सुत्तरमन्द्रा स्याद्रजनी चोत्तरायता ।
चतुर्थिच्छुद्धषड्जा पञ्चमी मत्सरीकृता ॥ ९० ॥
अजक्रान्ता तु षष्ठी च सप्तमी ""रुद्गता ।
प्रतिपत्त्यादितिथिषु जाता मन्द्रास्तु संयुताः ॥ ९१ ॥
सनिधपमगरिसा ज्ञातव्याः सप्त मूर्च्छनाः ।
षड्जग्रामाश्रिता ह्येता नारदेन विवक्षिताः ॥ ९२ ॥

मध्यसंवीरादिस्वरः ।

संवीरा हरिणाश्वा च स्यात्कलोपनतायता ।
शुद्धमध्या तथा चैव मार्दवी पौरवी तथा ॥ ९३ ॥
कृष्णप्रतिपदः सप्त तिथीषु (?) जनिताः स्वराः ।
तास्वरा (?) मध्यमग्रामे स्थापिता नारदेन च ॥ ९४ ॥
नन्दा विशाला सुमुखी चित्रा चित्रावती शुभा ।
आलापा चेति गान्धारग्रामे स्युः सप्त मूर्च्छनाः ॥ ९५ ॥
कृष्णाष्टम्यादितिथयः स्वराः सप्त हितास्तथा ।
गान्धारे स्थापितास्तेन नारदेन यथाक्रमम् ॥ ९६ ॥
सप्त स्वरास्तथा सप्त मूर्च्छना याः प्रकीर्तिताः ।
तानाश्चतुरशीतिस्तु ता एतस्मिन्निरूपिताः ॥ ९७ ॥

---

१ "सप्त स्वराश्चरी ग्रामाश्चतुर्दश" इति इतरः पाठः स्यात् । २ "चतुर्दश मूर्छनाश्च च" इति भरतादिप्रामाण्यात् पाठः । ३ "अश्वक्रान्ता तथा षष्ठी सप्तमी चाभिरुद्गता" इति भ. ना. पाठः ।



कूर्मीरवा च विज्ञेया तथाग्नी कैशिकी तथा ।
उच्चनीचा तथारूपा विरूपा विमलावतिः ॥ १०९ ॥
जातयोऽष्टादश ह्येवं ब्रह्मणा गदिताः पुरा ।
तद्विदित्वा नारदेन गीतरूपाणि वर्णयन् (?) ॥ ११० ॥

स्वरप्रकृतिविकृतयः ।

प्रकृती द्वे विजानीयात्स्वरतत्त्वेषु संस्थिते ।
तत्रापि च तयोर्मध्ये षड्जादि च निषादकम् ॥ १११ ॥
या सा प्रकृतिर्विज्ञेया भरतेन च चर्चिता ।
विकृतिश्च निषादादिषड्जान्तस्वरपूरिता ॥ ११२ ॥

तन्त्रीप्रकृतिविकृतयः ।

द्वितीया प्रकृतिः संज्ञा कथ्यते नारदेन च ।
षड्जादयोपश्रुतयश्चत्वारो गुणसंज्ञकाः (?) ॥ ११३ ॥
तेषु सर्वेषु वर्तन्ते वाद्यादयः प्रकल्पिताः ।
अनुवादि च वाद्यन्ताविततं कथ्यते बुधैः ॥ ११४ ॥

इति श्रीनारदकृतौ सङ्गीतमकरन्दे सप्तस्वरोत्पत्तिपञ्चनादोत्पत्तिप्रकृतिनिरूपणं
नाम प्रथमपादः ।

सङ्गीताध्याये द्वितीयः पादः ।

अथ सङ्गीतदेहनिरूपणम् ।

चैतन्यं सर्वभूतानां विवृतं जगदात्मना ।
नादब्रह्म तदानन्दमद्वितीयमुपास्महे ॥ १ ॥
गीतस्वरूपं वक्ष्याम्यतिविचित्रं मनोहरम् ।
राज्ञां कौतुकसंलापं विदुषां ज्ञानहेतुकम् ॥ २ ॥

---

१ 'कार्मीरवी च विज्ञेया तथाग्नी कैशिकी तथा' इति म. का. पाठः ।

वेलावली च भूपालः सोमरागस्तथैव च ।
एते रागास्तु गातव्याः प्रातःकाले विशेषतः ॥ १२ ॥
शङ्कराभरणः पूर्वो धलहंसस्तथैव च ।
देशी मनोहरी चैव सावेरी दोम्बुली तथा ॥ १३ ॥
काम्भोजी गोपिकाम्भोजी कैशिकी मधुमाधवी ।
पहुलीद्वयं मुखारी च तथा मङ्गलकौशिका ॥ १४ ॥
एते रागविशेषास्तु मध्याह्ने परिकीर्तिताः ।
शुद्धनाटा च सालङ्गो नाटी शुद्धवराटिका ॥ १५ ॥
गौलो मालवगौडश्च श्रीरागश्चाहरी तथा ।
तथा रामकृती रञ्जी छाया सर्ववराटिका ॥ १६ ॥
वराटिका द्रावटिका देशी नागवराटिका ।
कर्णाटहयगौटीति इत्येते चन्द्रमांशजाः ॥ १७ ॥
एते रागविशेषास्तु प्रातःकाले तु देवताः ।
सायमेषां प्रगानेन तस्य श्रीरतुला भवेत् ॥ १८ ॥
ईशानं च हरिं स्मृत्वा मध्याह्नादेरनन्तरम् ।
रागतः शृण्वतो वापि सर्वपापैः प्रमुच्यते ॥ १९ ॥
प्रहरैकोदयादर्वाक् प्रहरैकोदयोपरि ।
देशाक्षी भैरवा शुद्धा नादं यत्प्रहरोद्भवम् ॥ २० ॥
वराटिका तथा शुद्धा द्रावटीरागसंज्ञिका ।
प्रहरोपरि गातव्या महारी माहुरी तथा ॥ २१ ॥
आन्दोली च रामकृती छायानाटा च रङ्गका ।
मध्याह्नात्परतो यामे गौडरागानि यानि च ॥ २२ ॥
त्रियामोपरि गातव्या शुद्धसालङ्गनाटिका ।
एवं कालविधिं ज्ञात्वा गायेद्यः स सुखी भवेत् ॥ २३ ॥
रागावेलाप्रगानेन रागाणां हिंसको भवेत् ।
यः शृणोति स दारिद्री आयुर्नश्यति सर्वदा ॥ २४ ॥

देवताविषये गीतं पुण्यनामप्रवर्द्धनम् ।
आध्यात्मिकैर्य[1] योगेन सर्वपापप्रणाशनम् ॥ २५ ॥
विवाहसमये दानदेवतामुनिसंगमे ।
अथवेलरागमाकर्ण्यं[2] न दोषो भैरवीं विना ॥ २६ ॥
श्रीरागो मालवश्चैव तथा मालवकौशिका ।
सावेरी मेघरञ्जी च हिन्दोला कौशिकी तथा ॥ २७ ॥
तुण्डी तुरुष्कतुण्डी च पङ्गाली माहुरी तथा ।
देवक्रिया रागहंसी देशाक्षी भैरवी तथा ॥ २८ ॥
सालङ्गभैरवी चान्या कम्भारी च तथा परा ।
कर्णाटाहवपङ्गाला शुद्धहिन्दोलिका तथा ॥ २९ ॥
पुन्नाटः शुद्धनाटश्च तथा सारङ्गनाटिका ।
वेलावली छायनाटी रागरङ्गस्तथैव च ॥ ३० ॥
वराटी द्रावटी चैव तथा नागवराटिका ।
कर्णाटमिश्रनाटी च तथा शुद्धवराटिका ॥ ३१ ॥
कौमोदकी मलहरी सारङ्गो बहुलीद्वयम् ।
त्रोटी पहटिका चैव मुखारी मधुमाधवी ॥ ३२ ॥
मल्वारी गुर्जरी चैव सौराष्ट्री ललिता तथा ।
नागध्वनी च काम्भोजी धनाश्री च तथा परा ॥ ३३ ॥
कोलाहरश्छायगौडा रामा दोम्बुलिका तथा ।
वसन्तभैरवी चैव सावेरी सैन्धवी तथा ॥ ३४ ॥

अथ गृहस्वराः ।

सम्पूर्णरागो देशाक्षी मध्यमादिः प्रकीर्तितः ।
वसन्तभैरवी शुद्धभैरवी मादितः क्रमात् ॥ ३५ ॥
सम्पूर्णमालवीरागो गान्धारादिः प्रकीर्तितः ।
नाटरागश्च सम्पूर्णः स षड्जादिरुदाहृतः ॥ ३६ ॥
मुखहारी च सम्पूर्णो धैवतादिर्निगद्यते ।
सम्पूर्णश्चाहरी प्रोक्तो मध्यमादिरुपक्रमः ॥ ३७ ॥

---

१ °ध्यात्मिकेन योगेन° इति शुद्धः पाठः स्यात् । २ °अवेलराग° इति शुद्धः पाठः स्यात् ।

बलहंसश्च सम्पूर्णो गान्धारादिः प्रकीर्तितः ।
वसन्तः शुद्धसंज्ञश्च सपड्जादिरुदाहृतः ॥ ३८ ॥
रामक्रिया शुद्धसंज्ञा सपड्जादिरुदाहृता ।
वराटिका शुद्धसंज्ञा सपड्जादिरुपक्रमा ॥ ३९ ॥
एवं सम्पूर्णरागाणां गृहस्वर उदाहृतः ।

अथ षाडवरागगृहस्वर उच्यते ।

षाडवो देवगान्धारो गादिर्वर्ज्यो निषादकः (?) ॥ ४० ॥
नीलाम्बरी षाडवः स्याद्गादिर्वर्ज्यो निषादकः ।
श्रीरागः षाडवो रागः सपड्जादिर्गवर्जितः ॥ ४१ ॥
शुद्धबङ्गुली मध्यमादिर्निवर्ज्यस्तु षाडवः ।
शुद्धगौलः षाडवः स्यान्निषादादिर्धवर्जितः ॥ ४२ ॥
ललितः षाडवो रागः सादिर्वर्ज्यो ग च स्वरः (?) ।
मालवश्रीः षाडवः स्यात्षड्जादिश्च रिवर्जितः ॥ ४३ ॥
भूपालः षाडवो रागो गादिः षड्जविवर्जितः ।
पडवश्री षाडवश्च रिवर्ज्योऽपि निषादकः ॥ ४४ ॥
गुण्डक्री षाडवश्चैव गान्धारादिर्गवर्जितः ।
कुरञ्जी षाडवो रागो निवर्ज्यो मध्यमादितः ॥ ४५ ॥
सङ्गृह्य नारदेनैव गृहस्वरमुदीरितम् ।

अथ औडवरागगृहस्वराः ।

धन्यासी औडवः प्रोक्तः सावेरी धनिवर्जितः ॥ ४६ ॥
औडवो गुर्जरी प्रोक्तः सादिर्वर्ज्यौ रिधौ तथा ।
रिधौ वर्ज्यौ मध्यमादिरौडवा मधुमाधवी ॥ ४७ ॥
मेघरञ्जी मध्यमादि धनिवर्ज्यौ तथौडवः ।
वेलावल्यौडवः स्यात्तु गादिर्वर्ज्यौ सरीस्वरौ ॥ ४८ ॥

१ [illegible]

रामकृत्यौडवः स्यात्तु गादिर्वर्ज्यौ रिधौ स्वरौ ।
नारायणी निषादादिरौडवो धपवर्जितः ॥ ४९ ॥

पालिरौडवः षड्जादिर्वर्ज्यौ मध्यमपञ्चमौ ।
एवं प्रधानरागाः स्युर्लक्षणोक्तं यथाक्रमम् ॥ ५० ॥

अनन्ताः सन्ति सन्दर्भा नानादेश्याः प्रकीर्तिताः ।
सङ्कीर्णरूपिणो रागाः सङ्कीर्णा नाम विश्रुताः ॥ ५१ ॥

ब्रह्मा चा (?) षाडवाश्चैव क्षत्रजा औडवास्तथा ।
सम्पूर्णा मुनिजाः प्रोक्ता भरतज्ञैः प्रशंसिताः ॥ ५२ ॥

अथ पुल्लिङ्गरागाः ।

वङ्गालः सोमरागश्च श्रीरागश्च तथैव च ।
भूपाली छायगौडश्च शुद्धहिन्दोलिका तथा ॥ ५३ ॥

आन्दोली दोम्बुली चैव गौडः कर्णाटकाह्वयः ।
फडमञ्जी शुद्धनाटी तथा मालवगौलकः ॥ ५४ ॥

रागरङ्गच्छायनाटी रागः कोलाहलस्तथा ।
सौराष्ट्री च वसन्तश्च शुद्धसारङ्गभैरवी ॥ ५५ ॥

रागध्वनिस्तथा ह्येते पुंरागाः परिकीर्तिताः ।
नारदेन विचित्रेण सन्ति नामानि वक्ष्यते (?) ॥ ५६ ॥

अथ स्त्रीरागाः ।

तुण्डी तुरुष्कतुण्डी च मल्वारी माहुरी तथा ।
पौरालिकी च काम्भारी मल्लानी सैन्धवी तथा ॥ ५७ ॥

मालद्वाख्या च गान्धारी देवक्री वेशिनी तथा ।
वेलावली च पहुली गुण्डक्री घूर्जरी तथा ॥ ५८ ॥

वराटी द्रावडी हंसी गौडी नारायणी तथा ।
आहरी मेघरञ्जी च मिश्रनादा यथाक्रमात् ॥ ५९ ॥

---

१ "ब्रह्मणा चा" इति मूलपाठः स्यात् ।

अथ नपुंसकरागाः ।

कौशिकी ललितश्चैव धनाशी च कुरङ्गिका ।
सौराष्ट्री द्राविडी शुद्धा तथा नागवराटिका ॥ ६० ॥
कौमोदकी च रामक्री सावेरी च तथैव च ।
कलहंसः सामवेदी शङ्कराभरणस्तथा ॥ ६१ ॥
नपुंसका इति प्रोक्ता रागलक्षणकोविदैः ।
एतन्मतं नारदस्य ब्रह्मणा कथितं पुरा ॥ ६२ ॥
रौद्रेऽद्भुते तथा वीरे पुंरागैः परिगीयते ।
शृङ्गारहास्यकरुणं (?) स्त्रीरागैश्च प्रगीयते ॥ ६३ ॥
भयानके च बीभत्से शान्ते गायन्नपुंसके ।
अनेन विधिना ज्ञात्वा गेयं सर्वार्थसाधनम् ॥ ६४ ॥
शृणु चान्यं प्रवक्ष्यामि नादं चैव शुभाशुभम् ।
साम्प्रतं मुनिशार्दूल गीतगानविधिं तथा ॥ ६५ ॥
मध्यमादिर्मालवश्री श्रीकापि जयसाक्षिका ।
वराटी घूर्जरी गौडकोलाहलवसन्तकाः ॥ ६६ ॥
धन्नाश्री देशदेशाख्या बङ्गालादित्रयोदश ।
रागाङ्गरागमाख्यातं नारदेन महात्मना ॥ ६७ ॥
भूपालो भैरवश्चैव श्रीरागः वडमञ्जरी ।
वसन्तमालवी नाटबङ्गालाः पुरुषाः स्मृताः ॥ ६८ ॥
वेलावली मलहरी बहुली भूपयोषितः ।
देवक्रिया च वैराली कामभारी भैरवस्त्रियः ॥ ६९ ॥
श्रीरागपतिकाम्भोजी भङ्गाली च कुरङ्गिका ।
देशी मनोहरी तुण्डी वडमञ्जरियोषितः ॥ ७० ॥
सारङ्गनाटनाटाख्या अहरीनाटयोषितः ।
नारायणी च गान्धारी रञ्जी वङ्गालयोषितः ॥ ७१ ॥

१ °करुणे स्त्री° इति शुद्धः पाठः स्यात् ।

अकम्पाः कम्पसंयुक्ताः सकम्पाः कम्पवर्जिताः ।
यस्तच्छृणोति मूढात्मा तावुभौ ब्रह्मघातकौ ॥ ८५ ॥
विष्णुरूपो भवेत्तालो नादश्चैव शिवात्मकः ।
प्रणवो ब्रह्म चेत्याहुर्गीतशास्त्रविशारदाः ॥ ८६ ॥
तालं धृत्वा प्रमाणेन पश्चाद्गीतं समारभेत् ।
तथा नादं प्रकुर्वीत पश्चाद्गीतं प्रगीयते ॥ ८७ ॥
अनेनैव प्रकारेण गीतमाकर्णयेद्ध्रुवम् ।
तस्य नाभावदोषोऽस्ति महापातकतत्समः (?) ॥ ८८ ॥
श्रुतिहीनं च यद्गानं वीणावेण्वादिसम्भवम् ।
यः शृणोति स आप्नोति पातकं दुःखमेव च ॥ ८९ ॥
अपस्वरं कुनादं च श्रुतिहीनं तथाधिकम् ।
यः शृणोति स मूढात्मा पतते नरके चिरम् ॥ ९० ॥
शोकसन्तापदारिद्र्यमायुः क्षीणं भवेद्ध्रुवम् ।
राज्यनाशो मनोदुःखं भवत्येव न संशयः ॥ ९१ ॥
ज्ञात्वा सर्वमिदं शास्त्रं यः शृणोति सदा नृपः ।
आयुरारोग्यमैश्वर्यं लभते वाञ्छितं फलम् ॥ ९२ ॥

इति श्रीनारदकृतौ सङ्गीतमकरन्दे तृतीय-
पादः समाप्तः

सङ्गीताध्याये चतुर्थः पादः ।

अथ मृदङ्गलक्षणम् ।

दक्षिणाङ्गे स्थितो रुद्र उमा वामे प्रतिष्ठिता ।
शिवशक्तिमयो नादो मर्दले परिकीर्तितः ॥ १ ॥
शिवनादे भवेद्व्याधिः शक्त्या दारिद्र्यमाप्नुयात् ।
द्विनादयुक्तः श्रेष्ठश्च श्रुतियुक्तश्च मर्दले ॥ २ ॥
स्त्रीध्वनिः पुरुषाकारः रुयाकारश्चैव पुंस्वरः ।
आयुर्लक्ष्मीहरौ नित्यमश्राव्यौ तावुभौ ध्वनी ॥ ३ ॥

अकम्पाः कम्पसंयुक्ताः सकम्पाः कम्पवर्जिताः ।
यस्तच्छृणोति मूढात्मा तावुभौ ब्रह्मघातकौ ॥ ८५ ॥
विष्णुरूपो भवेत्तालो नादश्चैव शिवात्मकः ।
प्रणवो ब्रह्म चेत्याहुर्गीतशास्त्रविशारदाः ॥ ८६ ॥
तालं धृत्वा प्रमाणेन पश्चाद्गीतं समारभेत् ।
तथा नादं प्रकुर्वीत पश्चाद्गीतं प्रगीयते ॥ ८७ ॥
अनेनैव प्रकारेण गीतमाकर्णयेद्ध्रुवम् ।
तस्य नाभावदोषोऽस्ति महापातकतत्समः (?) ॥ ८८ ॥
श्रुतिहीनं च यद्गानं वीणावेण्वादिसम्भवम् ।
यः शृणोति स आप्नोति पातकं दुःखमेव च ॥ ८९ ॥
अपस्वरं कुनादं च श्रुतिहीनं तथाधिकम् ।
यः शृणोति स मूढात्मा पतते नरके चिरम् ॥ ९० ॥
शोकसन्तापदारिद्र्यमायुः क्षीणं भवेद्ध्रुवम् ।
राज्यनाशो मनोदुःखं भवत्येव न संशयः ॥ ९१ ॥
ज्ञात्वा सर्वमिदं शास्त्रं यः शृणोति सदा नृपः ।
आयुरारोग्यमैश्वर्यं लभते वाञ्छितं फलम् ॥ ९२ ॥

इति श्रीनारदकृतौ सङ्गीतमकरन्दे तृतीय-
पादः समाप्तः

सङ्गीताध्याये चतुर्थः पादः ।

अथ मृदङ्गलक्षणम् ।

दक्षिणाङ्गे स्थितो रुद्र उमा वामे प्रतिष्ठिता ।
शिवशक्तिमयो नादो मर्दले परिकीर्तितः ॥ १ ॥
शिवनादे भवेद्व्याधिः शक्त्या दारिद्र्यमाप्नुयात् ।
द्विर्नादयुक्तः श्रेष्ठश्च श्रुतियुक्तश्च मर्दले ॥ २ ॥
स्त्रीध्वनिः पुरुषाकारः रूपाकारश्चैव पुंस्वरः ।
आयुर्लक्ष्मीहरौ नित्यमभाव्यौ तावुभौ ध्वनी ॥ ३ ॥

रागद्वेषपरित्यागी (गः?) साधुत्वमुचितज्ञता ।
अनुच्छिष्टोक्तिनिर्बन्धो नूतनधातुविनिर्मितिः ॥ २७ ॥
परचित्तपरिज्ञानं प्रबन्धेषु प्रगल्भता ।
द्रुतगीतविनिर्माणं पदान्तरविदग्धता ॥ २८ ॥
त्रिस्थानगमकप्रौढो विविधालप्तिनैपुणः (?) ।
अवधानगुणैरेभिः वरो वाग्गेयकारकः ॥ २९ ॥
विद्यमानोऽधिकं चैवं मातृमन्दस्तु मध्यमः ।
धातुमातृप्रवीणः प्रबन्धेष्वपि मध्यमः ॥ ३० ॥
रम्यमातुविनिर्माता अधमो मन्दधातुकृत् ।
वरो वस्तु कविर्वर्णकविर्मध्यम उच्यते ॥ ३१ ॥
कुट्टकारोऽन्यकारस्तु मातुकारः प्रकीर्तितः ।
मार्गं देशीं च यो वेत्ति स गन्धर्वोऽभिधीयते ॥ ३२ ॥
यो वेत्ति केवलं मार्गं स्वरादिः स निगद्यते ।
हृद्यशब्दः सुशारीरो ग्रहमोक्षविचक्षणः ॥ ३३ ॥
रागरागाङ्गभाषाङ्गक्रियाङ्गोपाङ्गकोविदः ।
प्रबन्धगाननिष्णातो विविधालप्तितत्त्ववित् ॥ ३४ ॥
सर्वस्थानादिगमकेष्वनायासलसद्गतिः ।
आयत्तकण्ठस्तालज्ञः सावधानो जितश्रमः ॥ ३५ ॥
शुद्धस्थानलयाभिज्ञः सर्वकाकुविशेषवित् ।
अपारस्थायिसञ्चारः सर्वदोषविवर्जितः ॥ ३६ ॥
क्रियापरोचितालापः सुस्वरो धारणान्वितः ।
स्फूर्जन्निश्चजनो हारिरहकृद्भजनोद्धरः (?) ॥ ३७ ॥

---

१ 'रागद्वेषपरित्यागः साधुत्वमुचितज्ञता' इति सङ्गीतरत्नाकरे (पृ. २४४)। २ 'अनुच्छिष्टोक्तिनिर्बन्धो नूत्नधातुविनिर्मितिः' इति सङ्गीतरत्नाकरे। ३ 'त्रिस्थानगमकप्रौढिर्विविधालप्तिनैपुणम्' इति सङ्गीतरत्नाकरे। ४ °गुणैरेभिर्वरो वाग्गेय° इति सङ्गीतरत्नाकरस्थः पाठः। ५ °धिकं धातुं मातुमन्दस्तु मध्यमः° इति सङ्गीतरत्नाकरगतः पाठः। ६ °धातुमातुविदप्रौढः प्रब° इति सङ्गीतरत्नाकरे। ७ 'कुट्टिकारोऽन्यधाती तु मातुकारः प्रकीर्तितः' इति सङ्गीतरत्नाकरे। ८ 'स्फूर्जन्निर्जवनो हारिरह ष्कृद्भजनोद्धुरः' इति सङ्गीतरत्नाकरे।

सुसम्प्रदायो गीतज्ञैर्गायने गायनाग्रणीः ।
इत्युक्तमस्तु विज्ञेयो गीतज्ञः प्रतिपादितः ॥ ३८ ॥
गुणैः कतिपयैर्हीनो निर्दोषो मध्यमोत्तमः (मतः ?) ।
महामाहेश्वरेणोक्तः सदोषो गायकाधमः ॥ ३९ ॥
शिक्षाकारोऽनुकारश्च रसिको रञ्जकस्तथा ।
भावुकश्चेति विज्ञेया गायकाः पञ्चधा जगुः (?) ॥ ४० ॥
व्यक्तं पूर्णं प्रसन्नं च सुकुमारमलङ्कृतम् ।
समं सुरक्तं श्लक्ष्णं च निकृष्टं मधुरं तथा ॥ ४१ ॥
विद्ध्यैते स्युर्गुणानं ते (?) तत्र वक्ता (व्यक्तः) स्फुटस्वरः ।
प्रकृतिः श्रुतयश्चोक्तं छन्दोरागपदैः स्वरैः ॥ ४२ ॥
सुसम्पूर्णं च पूर्णाङ्गं प्रसन्नं प्रकटार्थकम् ।
सुकुमारं कण्ठभवं त्रिस्थानोक्तमलङ्कृतम् ॥ ४३ ॥
स्वरवर्णलयस्थानं स्वय(सम ?)मित्युच्यते बुधैः ।
सुरक्तं वल्लकीवंशकण्ठोत्थान्यैकतागुणम् (?) ॥ ४४ ॥
नीचोच्चप्लुतिमध्यादौ श्लक्ष्णता श्लक्ष्णउ(मु)च्यते ।
उच्चैरुच्चारणादुक्तं निकृष्टं भरतादिभिः ॥ ४५ ॥
मधुरं धुर्यलावण्यं पूर्णं जनमनोहरम् ।
दृष्टं लोके न शास्त्रेण श्रुतिकालविरोधि च ॥ ४६ ॥
येनैकत्तं (?) कलायासं गतश्रममयोदकम् ।
ग्राम्यं संदिग्धमित्येवं दशधानी तु दुष्टता ॥ ४७ ॥
एवं सङ्गीतशास्त्रज्ञैः कथिता लोकविश्रुताः ।

इति गीतदोषाः ।

षड्जर्षभगान्धारौ मध्यमः पञ्चमस्तथा ॥ ४८ ॥
धैवतश्च निषादश्च स्वराः सप्त प्रकीर्तिताः ।
षड्जादिस्वरसंमिश्रं गानं च परिकीर्तितम् ॥ ४९ ॥

---

१ 'भावुकश्चेति गीतज्ञाः पञ्चधा गायनं जगुः' इति सङ्गीतरत्नाकरे ।



अथ कविलक्षणम् ।

शुचिर्दक्षः शान्तः सुजनविनतः सूनृततरः
कलावेदी विद्वानतिमृदुपदः काव्यचतुरः ।
रसज्ञो दैवज्ञः सरसहृदयः सत्कुलभवः
शुभाकारश्छन्दोगुणगणविवेकी स च कविः ॥ ११ ॥

भटलक्षणम् ।

अनेकभाषासु विशेषबुद्धयो
नृपालवंशावलिकीर्तनक्षमाः ।
प्रबन्धविद्यापठने प्रवीणा
महीशयोग्या मगधा महीतले ॥ १२ ॥

अथ गायकलक्षणम् ।

षाडवौडवसम्पूर्णगायने जनरञ्जकाः ।
काकुवर्जितशारीरा गायका राजवल्लभाः ॥ १३ ॥

अथ परिहासकलक्षणम् ।

क्रियाङ्गभाषाङ्गसमस्तवञ्चना-
लसत्प्रसङ्गात्मिकवक्रयुक्तयः ।
प्रस्तावहास्योचितवाग्विलासा
बुधैः प्रशस्ताः परिहासका (के) गुणाः ॥ १४ ॥

इतिहासज्ञलक्षणम् ।

पुराणैरवशिष्टार्थैः व्याख्यानकथने क्षमाः(?) ।
इतिहासविदः साक्षाद्गीतवाद्यविचक्षणाः ॥ १५ ॥

अथ ज्योतिषलक्षणम् ।

ग्रनिप्रमाणान्यथजातकादीन्
ज्ञेयः सुसिद्धान्तविचारदक्षकः ।
ग्रहोपरागादिषु शुद्धलक्षणः
स पण्डितो देवगुरोः समानः ॥ १६ ॥

अथ वैद्यलक्षणम् ।

पाण्डुश्वासकफातिसारविषजाः कर्मज्वरा मूत्रजाः
मेदोद्रेककफोद्भवा हिमभवा वातानलीभिः क्रमात् (?) ।
तिस्रो वैद्यकसंहितासु निपुणः शास्त्रेषु बोधात्मवान्
दृष्टादृष्टविविधरोगहरणः सद्वैद्यधन्वन्तरिः ॥ १७ ॥

अथ पुराणिकलक्षणम् ।

आलापोक्तिषु चातुर्यं श्रुतिज्ञः सर्वशास्त्रवित् ।
पौराणिकः पुराणेषु कुशलः कथितो बुधैः ॥ १८ ॥

अथ सभापतिलक्षणम् ।

अनेकशृङ्गारविचित्ररूपः
सर्वज्ञचातुर्यरसान्वितोऽसौ ।
सङ्गीतसाहित्यकलानुरक्तो
निर्मत्सरो चापसुगुणोऽल्पेन ॥ १९ ॥
तद्वामपार्श्वेऽपि पुराणभट्टाः
तद्दक्षिणेऽमात्यपुरोहिताश्च ।
तत्पृष्ठभागेऽपि च कोषरक्षकः
समीपविद्वत्कविगान्धर्वपुंसः ॥ २० ॥
ततः सुविद्यावहुलक्षणान्वितः
कलाप्रवीणो बहुजानकादिमन् (?) ।
ततो भिषग्दैवविदौ समीपे
संस्थापयेद्दक्षिणकोविदैः क्रमात् ॥ २१ ॥
महीशवामे वरमध्यमण्डलं
संस्थापयेत्सैन्यपतिं क्रमाच्च ।
पार्श्वोभयोर्वन्दिभटप्रवीणा
शृङ्गारगानश्रवणार्थकाश्च ॥ २२ ॥

---

१ [illegible]

सा चित्रिणी शङ्खिनिहस्तिनी क्रमात्
सा पद्मिनी रूपविलाससंभ्रमाः ।
आपालतारुण्यविदग्धयौवना
बिम्बाधरा शोभितचन्द्रिकाननाः ॥ २९ ॥
पीनोन्नतोत्तुङ्गकुचाभिशोभिताः
सकञ्चुका रत्नविचित्रभूषणाः ।
तद्रम्यरूपाः कुचकुम्भशोभिता
विचित्रहारा मणिमौक्तिकैर्युताः ॥ ३० ॥
सपादहस्ताब्जसुखाब्जरेखाः
सलक्षणा युक्तकपोलरम्याः ।
कुचौ विशालौ मृदुवेणिभेदाः
पुष्पाण्यलङ्कृत्य मनोहराणि ॥ ३१ ॥
लज्जान्विता मृदुवचो (?) बहुनृत्यगीता
लावण्यहंसगमना बहुलास्ययुक्ताः ।
गन्धर्वशास्त्रनिपुणा रमणाश्च रम्भा-
तिलोत्तमा और्वशिमेनका मताः (?) ॥ ३२ ॥
राज्यर्पिता दर्शिरमोपयौवना
विद्याकलारागसुगर्वरञ्जकाः ।
पुष्पाञ्जलिं दापयितुं समारभे-
द्रङ्गप्रदेशं प्रति लज्जितागताः ॥ ३३ ॥
अङ्गेनालम्बयेद्गीतं हस्तेनार्थं प्रदर्शयेत् ।
नेत्राभ्यां भावयेद्भावं पादाभ्यां तालनिर्णयः ॥ ३४ ॥
एवं भावमनो धृत्वा पुष्पाञ्जलिपुरःसरम् ।
महीन्द्रस्य समीपाग्रे रङ्गपीठे समर्पयेत् ॥ ३५ ॥
हस्तपात्रेऽर्पितकुचौ करौ विनतिनाकृती ।
नेत्रजातिसमेतैवं नीराजनकृता नृपम् (?) ॥ ३६ ॥

अथ पुष्पाञ्जलिः ।

ब्रह्मा तालधरो हरिश्च पटही वीणाकरी भारती
वंशज्ञौ शशिभास्करौ श्रुतिधराः सिद्धाप्सराः किन्नराः ।
नन्दीभृङ्गिरिटादिमर्दलधराः सङ्गीतको नारदः
शम्भोर्नृत्तकरस्य मङ्गलतनोर्नाट्यं सदा पातु नः ॥ ३७ ॥

लक्ष्मीस्ते सदने सदा निवसतां चित्ते च चिन्तामणिः
स्वर्धेनुस्तव गोकुले सुरतरुश्चारामभूमौ तव ।
वाणी ते वदने दया नयनयोर्दानं करे तेऽन्वहं
विष्णुश्चेतसि ते मतिश्च सुकृते कीर्तिश्च लोकत्रये ॥ ३८ ॥

इन्दुं कैरविणीव कोकपटलीवाम्भोजिनीबान्धवं
मेघं चातकमण्डलीव मधुपश्रेणीव पद्माकरम् ।
माकन्दं पिकसुन्दरीव रमणीवात्मेश्वरं प्रोषितं
चेतोवृत्तिरियं मम क्षितिपते त्वां द्रष्टुमुत्कण्ठते ॥ ३९ ॥

इति पूर्वपुष्पाञ्जलिः ।

अथ पञ्चतालोत्पत्तिनिरूपणमाह ।

सदाशिवमुखोद्भूतास्तालाः पञ्चविधाः स्मृताः ।
सद्योजातमुखात्पूर्वमृग्वेदादुद्भवस्तथा ॥ ४० ॥
तस्माच्चच्चत्पुटो ज्ञेयः कान्तिर्गोक्षीरवर्णकः ।
ब्रह्मजातिसमाख्यातो गोपुच्छ इति संज्ञकः ॥ ४१ ॥
वामदेवे दक्षिणे च मुखे याजुपसम्भवम् ।
तस्माच्चाचपुटाख्यं (?) हि तालः क्षत्रियजातिकः ॥ ४२ ॥
पिपीलिका इति ज्ञेया वर्णकुङ्कुमकेसरी ।
दक्षिणे यजुषामाहुर्नारदेन प्रकीर्तितः ॥ ४३ ॥
अघोरे पश्चिमे मंत्रे मुखे जातो ह्यथर्वणः ।
षट्पितापुत्रकस्तालस्तस्मादुद्भवपिप्पले (?) ॥ ४४ ॥
वैश्यजातिरिति प्रोक्तः कनकाभ इति स्मृतः ।
मुरजा इति नामाख्यं नारदेन प्रशंसितम् ॥ ४५ ॥

"पदर्शकः" इति सङ्गीतेन पठः माग्र ।

तत्पुरुषेत्युत्तरे च मुखे सामवेदोद्भवं तथा ।
सम्पद्वेष्टिकतालोऽयं तस्मात्सम्भवमुच्यते (?) ॥ ४६ ॥
गान्धर्वमिति संज्ञं च मणिवर्णप्रशंसितम् ।
रिगमा इति संज्ञं तु ऋषिभिः प्रतिपादितम् ॥ ४७ ॥
ईशानोर्ध्वमुखे जातः शास्त्रागमसमन्वितः ।
तस्मादुद्भव उद्धट्टतालोऽयं नामतः क्रमात् ॥ ४८ ॥
नानाजातिर्नीलवर्णो यतिः समयतिः क्रमात् ।
रुद्रपञ्चमुखेभ्यश्च तालाः पञ्चविधा मताः ॥ ४९ ॥
ब्रह्महा च सुरापानी स्वर्णस्तेयी च तल्पगः ।
तत्संयोगी पञ्चमश्च येऽतिपातकिनः स्मृताः ॥ ५० ॥
तद्दोषपरिहारार्थं प्रायश्चित्तमुदीरितम् ।
गणैर्नन्दीश्वराद्यैश्च ऋषिभिर्नारदादिभिः ॥ ५१ ॥
आदितालादितालानामेकोत्तरशतं क्रमात् ।
शृण्वतां पातकहरं राज्ञां क्रतुफलं लभेत् (?) ॥ ५२ ॥
राज्याभिवृद्धिसन्तानं रणे शत्रुविनाशनम् ।
सौभाग्यारोग्यमतुलं कामशास्त्रविवर्धनम् ॥ ५३ ॥
लास्याङ्गे संपरिज्ञानं फलावेदिनमुत्तमम् (?) ।
सर्वसङ्गीतसुभगं नृपाणां कीर्तिवर्धनम् ॥ ५४ ॥

इति श्रीनारदकृतौ सङ्गीतमकरन्दे नृत्ताध्याये नाट्यशालासभासभापतिपात्रपुष्पाञ्जलिपञ्चतालोत्पत्तिनिरूपणं नाम प्रथमः पादः ।

नृत्याध्याये द्वितीयः पादः ।

सदाशिवो हरिर्ब्रह्मा भरतः कश्यपो मुनिः ।
मतङ्गो यष्टश्च दुर्गा च शक्तिशार्दूलकोहलाः ॥ १ ॥
हनूमांस्तुम्बुरुश्चैव अङ्गदश्चैव नारदः ।
एते साहित्यसर्वज्ञा बुधास्तालान्प्रचक्रमुः ॥ २ ॥

जनको मद्दलक्ष्मीशो रागवर्धनसंज्ञकः ।
उत्सवश्चेति तालानामेकेनाभ्यधिकं शतम् ॥ १६ ॥
तल्लक्षणं हि वक्ष्येऽहं मुनिनारद इत्यसौ ।

अथ ताललक्षणमाह ।

ताले चचत्पुटे ज्ञेयं गुरुद्वन्द्वं लघुप्लुतम् ॥ १७ ॥
गुरुर्लघुर्गुरुश्चैव भवेच्चाचपुटाभिधे ।
पलगा गलपाश्चैव षट्पितापुत्रकस्तथा ॥ १८ ॥
मगणः स्यात्प्लुताद्यन्तं (:) संपद्वेष्टाख्यसंज्ञके ।
उद्व(द्ध)ट्टो मगणस्त्वेक आदितोऽतिलघुः स्मृतः ॥ १९ ॥
दर्पणः स्याद्द्रुतद्वन्द्वं गुरुश्चैव प्रकीर्तितः ।
अष्टगुर्वेकचर्चर्यां विरामं च द्रुतौ लघुः ॥ २० ॥
सिंहलीले विधातव्यं लघ्वाद्यन्तं द्रुतत्रयम् ।
द्रुतद्वयं –कारश्च कन्दर्पे परिकीर्तितः ॥ २१ ॥
सिंहविक्रमतालस्तु मगणो लपलौ गपौ ।
श्रीरङ्गसंज्ञके ताले सगणो लगपो मतः ॥ २२ ॥
रतिलीले विधातव्यं लघ्वोर्मध्ये गुरुद्वयम् ।
चत्वारो रङ्गताले स्याद्द्रुतौ(ता)गुरुस्ततः परम् ॥ २३ ॥
परिक्रमे द्रुतद्वन्द्वे यगणस्तदनन्तरम् ।
प्रत्यङ्गसंज्ञके ताले मगणः स्याल्लघुद्वयम् ॥ २४ ॥
लचतुष्कं विरामान्त्यं गजलीले प्रकीर्तितम् ।
लघुर्गुरुः प्लुतश्चैव त्रिभिन्ने परिकीर्तितः ॥ २५ ॥
वीरविक्रमताले तु लौ द्रुतौ च गुरुस्तथा ।
सविरामं लघुद्वन्द्वं ताले स्याद्धंसलीलके ॥ २६ ॥
वर्णभिन्नाभिधे ताले द्रुतद्वन्द्वं लघुर्गुरुः ।
राजचूडामणौ ताले द्रुतौ लश्च द्रुतौ लगः ॥ २७ ॥
रङ्गद्योतेन तालेन भगणो लप्लुतावपि ।
गपौ द्रुतौ गलो(लः)पश्च राजताले प्रकीर्तितः ॥ २८ ॥

---

१ अत्र आदर्शपुस्तकेऽक्षरमेकं त्रुटितम् ।

द्विला पो गगलो(लः)पञ्चसिंहविक्रीडिते लपौ ।
द्वौ द्रुतौ लो द्रुतौ चैव वनमाली गुरुस्तथा ॥ २९ ॥
गुरुर्लघुद्रुतौ गुश्च वर्णः स्याच्चतुरस्रके ।
लघुद्रुतौ लघू गश्च तिस्रवर्णः प्रकीर्तितः ॥ ३० ॥
प्रतितूर्यचिरामान्त्यं मिश्राख्यो द्वादशद्रुताः ।
प्लुतो गुरुद्रुतद्वन्द्वं गद्वयं लो गुरुस्तथा ॥ ३१ ॥
रङ्गप्रदीपताले स्यात्तगणाद्गप्लुतो यदि ।
गप्लुतौ द्रुतयुग्मं च हंसनादे प्रकीर्तितः (तम्) ॥ ३२ ॥
यगणो लगुरुश्चैव सिंहनादो निरूपितः ।
ताले स्यान्मल्लिकामोदे गद्वयं लचतुष्टयम् ॥ ३३ ॥
लघुद्रुतचतुष्कं स्याल्लघुः शरभलीलके ।
तगणो लो प्लुतौ गश्च रङ्गाभरणसंज्ञके ॥ ३४ ॥
तुरङ्गलीलताले स्याद्द्रुतद्वन्द्वं लघुस्तथा ।
तपा लगद्रुतौ गालपलपालश्च लद्वयम् ॥ ३५ ॥
निपद्वं (निःशब्दं) लचतुष्कं स्यात्ताले स्यात्सिंहनन्दने ।
रगणो लगुरुश्चैव जयश्रीरिति गण्यते ॥ ३६ ॥
भवेयुर्विजयानन्दे लद्वयं गुरवस्त्रयः ।
ललितौ प्रतिताले स्याद्रतौ लश्च द्वितीयके ॥ ३७ ॥
मकरन्दे द्रुतद्वन्द्वं लघुत्रयमतो गुरुः ।
लगौ पगौ लपौ गश्च कीर्तिताले प्रकीर्तितः ॥ ३८ ॥
प्लुतो गश्च प्लुतो गश्च ताले विजयसंज्ञके ।
सकारश्च सकारश्च जयमङ्गलनाम च ॥ ३९ ॥
लघुयुक्तो द्रुतौ ताले राजविद्याधराभिधे ।
सकारो मण्टताले स्यात्कल्पितं पचतुष्टयम् (?) ॥ ४० ॥
भारो रोपो गुरुद्वन्द्वं निःशब्दं मठतालके ।
अथवा नगणो जश्च लघुश्चैव प्रकीर्तितः ॥ ४१ ॥
जगणो लो द्रुतौ पश्च जयताले निरूपितः ।
द्रुतद्वयं लघुद्वन्द्वं भवेत्ताले कुडुक्के ॥ ४२ ॥

लघुद्वन्द्वं विरामान्त्यं ताले निःसारुके भवेत् ।
द्रुतद्वन्द्वं विरामान्त्यं क्रीडाताले प्रकल्पितम् ॥ ४३ ॥
चन्दनिःसारुगीताले लुतमेवाभिधीयते ।
सकारो गुरुलश्चैव त्रिभङ्गिरभिधीयते ॥ ४४ ॥
कोकिलप्रियताले स्यात्क्रमाद्गुरुलघुलुताः ।
ताले निःसारुके ज्ञेयो लघुश्चैव विधीयते (?) ॥ ४५ ॥
श्रीकीर्तिसंज्ञके ताले गुरुद्वन्द्वं लघुद्वयम् ।
